योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०८

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

नाकृतिर्न च कर्माणि न स्पन्दो न पराक्रमः ।

तन्मिथ्याज्ञानवद्रूढं दैवं नाम किमुच्यते ।। १

स्वकर्मफलसंप्राप्ताविदमित्थमितीति याः ।

गिरस्ता दैवनाम्नैताः प्रसिद्धिं समुपागताः ।। २

तत्रैव मूढमतिभिर्दैवमस्तीति निश्चयः ।

आत्तो दुरवबोधेन रज्ज्वामिव भुजंगमः ।। ३

ह्यस्तनी दुष्क्रियाभ्येति शोभां सत्क्रियया यथा ।

अद्यैवं प्राक्तनी तस्माद्यत्नात्सत्कार्यवान्भवेत् ।। ४

मूढानुमानसंसिद्धं दैवं यस्यास्ति दुर्मतेः ।

दैवाद्दाहोऽस्ति नैवेति गन्तव्यं तेन पावके ।। ५

दैवमेवेह चेत्कर्तुं पुंसः किमिव चेष्टया ।

स्नानदानासनोच्चारान्दैवमेव करिष्यति ।। ५

किंवा शास्त्रोपदेशेन मूकोऽयं पुरुषः किल ।

संचार्यते तु दैवेन किं कस्येहोपदिश्यते ।। ७

न च निस्पन्दता लोके दृष्टेह शवतां विना ।

स्पन्दाच्च फलसंप्राप्तिस्तस्माद्दैवं निरर्थकम् ।। ८

न चामूर्तेन दैवेन मूर्तस्य सहकर्तृता ।

पुंसः संदृश्यते काचित्तस्माद्दैवं निरर्थकम् ।। ९

मिथोऽङ्गानि समासाद्य द्वयोरेकैककर्तृता ।

हस्तादीनां हतत्वे ह न दैवेन क्वचित्कृतम् ।। १०

मनोबुद्धिवदप्येतद्दैवं नेहानुभूयते ।

आगोपालं कृतप्रज्ञैस्तेन दैवमसत्सदा ।। ११

पृथक्चेद्बुद्धिरन्योऽर्थः सैव चेत्कान्यता तयोः ।

कल्पनायां प्रमाणं चेत्पौरुषं किं न कल्प्यते ।। १२

नामूर्तेस्तेन सङ्गोऽस्ति नभसेव वपुष्मतः ।

मूर्तं च दृश्यते लग्नं तस्माद्दैवं न विद्यते ।। १३

विनियोक्रथ भूतानामस्त्यन्यच्चेज्जगत्त्रये ।

शेरते भूतवृन्दानि दैवं सर्वं करिष्यति ।। १४

दैवेन त्वभियुक्तोऽहं तत्करोमीदृशं स्थितम् ।

समाश्वासनवागेषा न दैवं परमार्थतः ।। १५

मूढैः प्रकल्पितं दैवं तत्परास्ते क्षयं गताः ।

प्राज्ञास्तु पौरुषार्थेन पदमुत्तमतां गताः ।। १६

ये शूरा ये च विक्रान्ता ये प्राज्ञा ये च पण्डिताः ।

तैस्तैः किमिव लोकेऽस्मिन्वद दैवं प्रतीक्ष्यते ।। १७

कालविद्भिर्विनिर्णीता यस्यातिचिरजीविता ।

स चेज्जीवति संछिन्नशिरास्तद्दैवमुत्तमम् ।। १८

कालविद्भिर्विनिर्णीतं पाण्डित्यं यस्य राघव ।

अनध्यापित एवासौ तज्ज्ञश्चेद्दैवमुत्तमम् ।। १९

विश्वामित्रेण मुनिना दैवमुत्सृज्य दूरतः ।

पौरुषेणैव संप्राप्तं ब्राह्मण्यं राम नान्यथा ।। २०

अस्माभिरपरै राम पुरुषैर्मुनितां गतैः ।

पौरुषेणैव संप्राप्ता चिरं गगनगामिता ।। २१

उत्साद्य देवसंघातं चक्रुस्त्रिभुवनोदरे ।

पौरुषेणैव यत्नेन साम्राज्यं दानवेश्वराः ।। २२

आलूनशीर्णमाभोगि जगदाजह्रुरोजसा ।

पौरुषेणैव यत्नेन दानवेभ्यः सुरेश्वराः ।। २३

राम पौरुषयुक्त्या च सलिलं धार्यतेऽनया ।

चिरं करण्डके चारु न दैवं तत्र कारणम् ।। २४

भरणादानसंरम्भविभ्रमश्रमभूमिषु ।

शक्तता दृश्यते राम न दैवस्यौषधेरिव ।। २५

सकलकारणकार्यविवर्जितं

निजविकल्पवशादुपकल्पितम् ।

त्वमनपेक्ष्य हि दैवमसन्मयं

श्रय शुभाशय पौरुषमुत्तमम् ।। २६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे दैवनिराकरणं नामाष्टमः सर्गः ।। ८ ।।